# वैयाकरणसिद्धान्तकौमुदी

## स्वादिसन्धिप्रकरणम् (३)

२९.११.२०१०

# १७३. रो रि (८.३.१४)

- पदद्वयम् । रः, रि ।
- 'ढो ढे लोपः' (८.३.१३) इत्यतः 'लोपः' इति अनुवर्तते ।
- रः – षष्ठी = रेफस्य स्थाने
- रि – सप्तमी = रेफे परे
- लोपः – प्रथमा = विधेयः = लोपः स्यात्
- रेफस्य रेफे परे लोपः स्यात् ।
- पुनर् + रमते = पुन रमते ।

# १७४. ढ्रूलोपे पूर्वस्य दीर्घोऽणः (६.३.१११)

- ढरेफौ लोपयतीति तथा, तस्मिन् वर्णे अर्थात् ढकारे रेफात्मके परे पूर्वस्य अणः दीर्घः स्यात् ।
- पुना रमते ।
- हरिर् + रम्यः = हरि रम्यः = हरी रम्यः ।
- शम्भुर् + राजते = शम्भु राजते = शम्भू राजते ।

- ढकारलोपनिमित्ते ढकारे, रेफलोपनिमित्ते रेफे परे पूर्वस्य अणः दीर्घः इति फलितार्थः ।
- ढकारलोपे रेफलोपे च पूर्वस्य अणः दीर्घः इत्येव उक्ते तु, अनीयर् प्रत्यये 'हलन्त्यम्' इति हल्संज्ञायाम्, 'तस्य लोपः' इत्यनेन रेफस्य लोपेऽपि पूर्वस्य अकारस्य दीर्घः स्यात् ।

- अणः किम्?
- तृह् हिंसायाम्
- तृह् त ('निष्ठा' – ३.२.१०२ – इति भूते क्तप्रत्ययः)
- तृढ् त ('हो ढः' – ८.२.३१ – इति हकारस्य ढकारः)
- तृढ् ध ('झषस्तथोर्धोऽधः' – ८.२.४० – इति तकारस्य धकारः)
- तृढ् ढ ('ष्टुना ष्टुः' – ८.४.४१ – इति ष्टुत्वेन धकारस्य ढकारः)
- तृ ढ ('ढो ढे लोपः' – ८.३.१३ – इति ढलोपः)
- ऋकारः न अण् । तस्मादत्र दीर्घो न ।
- एवं वृह् उद्यमने – वृढः ।

## पूर्वग्रहणम् अनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घार्थम् ।

- 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषा वर्तते ।
- सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण अव्यवहितस्य पूर्वस्य बोध्यम् ।
- 'ढ्लोपे' इति सप्तमीनिर्देशेन विधीयमानः दीर्घः अनया परिभाषया अव्यवहितस्य पूर्वस्य अणः एव भवति । पुनः सूत्रे 'पूर्वस्य' इति किमर्थम्?
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः ६.३.१३९ पर्यन्तम् उत्तरपदाधिकारः ।
- पूर्वग्रहणाभावे ढ्लोपनिमित्ते उत्तरपदे परे पूर्वस्य अणः दीर्घः इत्यर्थः स्यात् । यत्र तु समाने पदे लोपनिमित्तम्, तत्र दीर्घः न स्यात् ।

- गृधु अभिकांक्षायाम् – धातोः यङ्लुकि लङ् लकारे सिप् प्रत्यये,
- अजर्घर् र् इति स्थिते,
- अजर्घ  र्  ('रो रि' इति रेफलोपः)
- अत्र उत्तरपदं नास्ति । तथापि दीर्घः क्रियते ।
- अजर्घा र्
- अजर्घाः

- लिह् त
- लिढ् त (हो ढः)
- लिढ् ध (झषस्तथोर्धोऽधः)
- लिढ् ढ (ष्टुना ष्टुः)
- लि ढ (ढो ढे लोपः)
- ली ढ (ढ्रलोपे पूर्वस्य दीर्घोऽणः)
- लीढः

- मनस् रथः इत्यत्र रुत्वे कृते 'हशि च' (६.१.११४) इत्युत्वे, 'रो रि' (८.३.१४) इति रेफलोपे च प्राप्ते,

# १७५. विप्रतिषेधे परं कार्यम् (१.४.२)

- तुल्यबलविरोधे सति परं कार्यं स्यात् ।
- उदाः राम + भ्याम् ('सुपि च' – ७.३.१०२ – यञादौ सुपि परे अदन्तस्य अङ्गस्य दीर्घः स्यात्) = रामाभ्याम्
- राम + सु ('बहुवचने झल्येत्' – ७.३.१०३ – झलादौ बहुवचने सुपि परे अतोऽङ्गस्य एकारः स्यात्) = रामे सु
- राम + भ्यस् = ???
- परत्वात् एत्वम् । रामेभ्यः ।
- इति रेफलोपे प्राप्ते,
- 'पूर्वत्रासिद्धम्' इति 'रो रि' इत्यस्य असिद्धत्वाद् उत्वमेव ।
- मनस् + रथः = मनोरथः

# १७६. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६.१.१३२)

- अककारयोः एतत्तदोः यः सुः तस्य लोपः स्यात् हलि, न तु नञ्समासे ।
- एष सुँ विष्णुः = एष विष्णुः
- स सुँ शम्भुः = स शम्भुः
- अकोः किम्?
- एषक सुँ रुद्रः = एषको रुद्रः
- अनञ्समासे किम्?
- न सः = असः । अस सुँ शिवः = असश्शिवः ।
- हलि किम्?
- एष सुँ अत्र = एषोऽत्र

# १७७. सोऽचि लोपे चेत् पादपूरणम् (६.१.१३४)

- 'सस्' इत्यस्य सोः लोपः स्याद् अचि, पादश्चेत् लोपे सत्येव पूर्येत ।
- सेमामविड्ढि प्रभृतिम् – अनुष्टुप् छन्दः ।
- स सु + इमाम् = स इमाम् = सेमाम्
- रुत्वे, यत्वे, 'लोपः शाकल्यस्य' इत्यनेन यलोपे तस्य असिद्धत्वात् गुणः न स्यात् ।
- इह ऋक्पाद एव गृह्यते इति वामनः ।
- अविशेषात् श्लोकपादोऽपि इत्यपरे ।
- सैष दाशरथी रामः ।

- ’लोपे चेत्’ इति किम्?
- स इत्क्षेति । स एवमुक्त्वा ।
- ’सत्येव’ इत्यवधारणं तु ’स्यश्छन्दसि बहुलम्’ (६.१.१३३) इति पूर्वसूत्राद् बहुलग्रहणानुवृत्त्या लभ्यते ।
- तेन इह न – सोऽहमाजन्मशुद्धानाम् ।
- लोपे कृते, सवर्णदीर्घे , ’साहमाजन्मशुद्धानाम्’ इत्यत्रापि पादः पूर्यते, किन्तु लोपं विनापि पादः पूर्यत एव । अतः अत्र न लोपः ।

# १७८. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१.२.४५)

- धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ।